CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.
Coll. No. 770

Title Dvaitavivekapada-yojanā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 770 Subject: Vedanta.

Title: Dvaitavivekāpadayojanā

Author: Vidyāranya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11·2" by 5·2" Extent: 12 foll.

Language: Sanskrit Script: Devanāgari

Remarks: —

श्रीगुरवेनमः॥ ॥नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥मयाद्वैतविवेकस्यक्रियतेपदयोजना॥
॥१॥ ॥चिकीर्षितस्यग्रंथस्यनिर्विघ्नपरिपूरणायाभिलषितदेवतातत्त्वानुस्मरणलक्षणंमंगलमाचरन्नस्यवे
दांतप्रकरणत्वाद्याशास्त्रीयमेवानुबंधचतुष्टयंसिद्धवत्कृत्यग्रंथारंभंप्रतिजानीते॥ईश्वरेणेति॥ईश्व
रेणकारणोपाधिकेनांतर्यामिणाजीवेनापिकार्योपाधिकेनाहंप्रत्ययिनाचसृष्टमुत्पादितंद्वैतंजगदि

ईश्वरेणापिजीवेनसृष्टंद्वैतंविविच्यते॥विवेकेसतिजीवेनहेयो
बंधःस्फुटीभवेत्॥१॥ ॥

विविच्यतेविविज्यप्रदर्श्यते॥अनेनद्वैतविवेचनस्यकर्तव्यत्वप्रतिज्ञावृत्तिःप्रयोजनत्वंदर्शयति॥विवेकेइ
ति॥जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचनेकृतेसतिजीवेनपृथक्कृतेनहेयःपरित्याज्योबंधोबंधहेतुर्द्वैतं
स्फुटीभवेत्॥स्पष्टतांगच्छेत्॥एतावताजीवेनहेयमितिनिश्चीयतइत्यर्थः॥१॥ ॥

द्वै॰वि॰
१

नन्वदृष्टद्वाराजीवानामेवजगद्धेतुत्वंवादिनोवर्णयंति॥अतःकथमीश्वरसृष्टत्वमुच्यतेजगतइत्याशंक्या
त्वकृत्स्नश्रुतिविरोधान्नेदंचोद्यमुत्थापयितुमर्हतीत्यभिप्रेत्यश्वेताश्वतरवाक्यंतावदर्थतःपठति॥मायांत्वि
ति॥मायोपाधिकमीश्वरंजानीयात्॥मायीमायिनःसृजनेविश्वमेतदितितस्यैवेश्वरस्यजगत्स्रष्टृत्वंश्वेताश्वतरशा
खिनोवर्णयंतीत्यर्थः॥२॥एवमैतरेयोपनिषद्वाक्यमर्थतोनुसंक्रामति॥आत्मेति॥आत्मावाइदमेकए

मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरं॥समायीसृजतीत्याहुःश्वेताश्वतरशाखिनः॥२॥
आत्मावाइदमग्रेभूत्सईक्षतसृजाइति॥संकल्पेनासृजल्लोकान्सएतानितिबह्वृचाः॥३॥
खंवाय्वग्निजलोर्व्योषध्यन्नदेहाःक्रमादमी॥संभूताब्रह्मणस्तस्मादेतस्मादात्मनोखिलाः॥
४

वाग्रआसीन्नान्यत्किंचनमिषत्सईक्षतलोकान्नुसृजाइतिसइमाँल्लोकानसृजतेत्यनेनवाक्येनाद्विती
यस्यपरमात्मनएवजगत्स्रष्टृत्वंबह्वृचाऋक्शाखाध्यायिनआहुरित्यर्थः॥३॥ईश्वरस्यजगत्का
रणत्वेतैत्तिरीयश्रुतिरपिप्रमाणमित्यभिप्रेत्यतद्वाक्यमर्थतःपठति॥खमिति॥४॥ ॥

सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूतः इत्यादिनान्नात्पुरु
षः इत्यंतेन वाक्येन गुहाहितेन ब्रह्मणा ईश्वरेण आकाशादिदेहपर्यंतं जगदुत्पन्नमित्यभिधा
य पुरस्तादपि सोऽकामयत बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदिदं
किंचेति वाक्येन तस्यैव ब्रह्मणो जगत्सर्जनेच्छापूर्वकपर्यालोचनेन जगत्स्रष्टृत्वं तित्तिरिराहेत्यर्थः॥

बहु स्यामहमेवातः प्रजायेयेति कामतः॥ तपस्तप्त्वासृजत्सर्वं जगदित्याह तित्तिरिः॥५॥
इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत॥ तेजोऽबन्नांडजादीनि ससर्जेति च सामगाः॥६॥

॥५॥ छांदोग्येपि ब्रह्मण एव जगत्स्रष्टृत्वं श्रुतमित्याह। इदमिति॥ सदेव सोम्येदमग्र आसीदेक
मेवाद्वितीयमिति सद्रूपमद्वितीयं ब्रह्मोपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादि
नात्रस्यैव ब्रह्मणः पूर्वं कृतेक्षणं बहुत्वमभिध्याय तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवं द्वै०वि०
त्यांडजं जीवजमुद्भिज्जमित्यादिना अंडजादिशरीरनिर्मातृत्वं च सामगा वर्णयंतीत्यर्थः॥६॥ २

मुंडकोपनिषद्यपि तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवंते सरूपाः तथाक्षराद्विविधाः सोम्य
भावाः प्रजायंते तत्र चैवापियंतीत्यक्षरनाम्नो ब्रह्मणो जगदुत्पत्तिः श्रूयत इत्याह। विस्फुलिंगेति॥ एवं बृ
हदारण्यकेप्यव्याकृतनाम्नो ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति श्रुतमित्याह। जगदिति
तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदंरूप इति वाक्येन स्पष्टः पुरास्पष्टना

विस्फुलिंगा यथा वह्नेर्जायंतेऽक्षरतस्तथा॥ विविधाश्चिज्जडा भावा इत्याथर्वणिकी श्रुतिः॥
जगदव्याकृतं पूर्वमासीद्व्याक्रियताधुना॥ दृश्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे॥८॥
विराण्मनुर्नरा गावः खराश्वाजावयस्तथा॥ पिपीलिकावधि द्वंद्वमिति वाजसनेयिनः॥९॥

मरूपत्वेनाव्याकृतत्वादव्याकृताभिधमायोपाधिकाद्ब्रह्मणो नामरूपयोः स्पष्टीकरणलक्षणसृष्टिरुक्ता। तयो
र्नामरूपयोर्विराडादिस्थूलकार्येषु स्पष्टत्वाच्च तदिदं मध्ये तर्हि नामरूपाभ्यामेव व्याक्रियतासौ नामायमिदं
रूपमिति वाक्येनाभिहितत्वाद्विराडादयश्चात्मैवेदमग्र आसीत्पुरुषविध इत्यादिना॥ एवमेव यदिदं किं
च मिथुनमा पिपीलिकाभ्यस्तत्सर्वमसृजतेत्यंतेन दर्शितेत्यर्थः॥९॥ ॥

उदाहृतानिः श्रुतिनिर्दिष्टैरिन्द्रियाभिधानानंतरं ब्रह्मणो जीवरूपेणात्र प्रवेशोऽभिहित इत्याह ॥ कृत्वेति ॥ श्रुत
यः जैवं जीवसंबंधि रूपांतरमविक्रियब्रह्मणो क्लिन्नानां विकारिरूपमित्यर्थः ॥ देहं देहजाते जीवत्वं कृत्वेत्यन्वया
हा जीवत्वमिति ॥१०॥ प्राणादीनां स्वामित्वेन प्रेरकत्वं प्राणधारणं तस्मात् केवलरूपं कृत्वा प्राविशदित्युक्तं किंतदि
त्यपेक्षायामाह ॥ चैतन्यमिति ॥ अधिष्ठानलिंगदेहकृत्स्नाधारभूतं यच्चैतन्यमस्ति यस्य तत्र कृत्स्नो लिंगदेहो
यः पुनश्चिच्छायालिंगदेहस्थायस्यास्ति लिंगदेहे वर्तमानश्चिदाभासस्तत्संघस्तेषां चयानां समूहो जीवशब्दा

कृत्वा रूपांतरं जैवं देहे प्राविशदीश्वरः ॥ इति ताः श्रुतयः प्राहुः जीवत्वं प्राणधारणात् ॥१०॥ चैतन्यं
यदधिष्ठानं लिंगदेहश्च यः पुनः ॥ चिच्छाया लिंगदेहस्था तत्संघो जीव उच्यते ॥११॥ माहेश्वरी तु मा
या या तस्या निर्माणशक्तिवत् ॥ विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ ॥१२॥ ॥

इत्येतत्र इत्यर्थः ॥११॥ नन्वीश्वरस्यैव जीवरूपेण प्रविष्टत्वेन तस्य तत्तदुःखित्वादिविरुद्धधर्मत्वं कुत इत्याशंक्याह ॥
माहेश्वरीति ॥ माहेश्वरी मायिनं तु महेश्वरमिति श्रुत्युक्ता महेश्वरसंबंधिनी या माया तस्या निर्माणशक्ति दे॰ वि॰ ३
वज्जगत्सर्जनसामर्थ्यवन्मोहशक्तिश्च मोहनसामर्थ्यमप्यस्तीति तद्देतत् जडं मोहात्मकमिति श्रुतेः ॥ ततः किमित्यत
आह ॥ तं जीवमिति ॥ असौ मोहशक्तिस्तं प्रसिद्धं जीवं मोहयति चिदानंदादिस्वरूपज्ञानरहितं करोतीति ॥१२॥

ततोऽपि किमित्यत आह ॥ मोहादिति ॥ मोहात्पूर्वोक्तादनीशतामिष्टानिष्टप्राप्तिपरिहारयोरसामर्थ्यं प्राप्य वपु
षि निमग्नः शरीरतादात्म्याभिमानं गतः शोचति दुःखित्वाद्यभिमानं करोति समाने वृक्षे पुरुषो निमग्नोऽनी
शया शोचति मुह्यमान इति श्रुतेरित्यर्थः ॥ तस्मात् एतस्याः कार्यपरिहाराय ब्रह्मैव निगमयति ॥ इत्याह ॥ इति समा
सतः संक्षेपेणेत्यर्थः ॥१३॥ ननु जीवस्य द्वैतसृष्टत्वे किं मानमित्याह ॥ सप्तान्नेति ॥ कथं तत्र प्रपंचितमित्यत्रा
कथमतस्तत्राह स्ववाच्य द्वैतसृष्टिप्रतिपादकं यत्कर्मकाण्डं [illegible] तेति वाक्यमयतः संगृह्णाति

मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ॥ ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः ॥१३॥ सप्तान्नब्राह्म
णेऽद्वैतं जीवसृष्टं प्रपंचितं ॥ अन्नानि सप्त ज्ञानेन कर्मणाऽजनयत्पिता ॥१४॥ मर्त्यान्नमेकं देवान्ने
द्वे पश्वन्नं चतुर्थकं ॥ अन्नत्रितयमात्मार्थमन्नानां विनियोजनं ॥१५॥ व्रीह्यादिकं दर्शपूर्णमासौ क्षी
रं तथा मनः ॥ वाक्प्राणश्चेति सप्तत्वमन्नानामवगम्यतां ॥१६॥

तीति ॥ पितासाहस्र [illegible] ब्राह्मणे वै
द्वारा जगदुत्पादनेन सर्वलोकपालको जीव इत्यर्थः ॥१४॥ अन्नत्रयस्य कर्मजत्वं [illegible] तद्विनि
योगोऽप्येकमसाधारणं द्वे देवानभाजयत् त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छदिति वाक्येनोक्तमित्याह ॥ मर्त्या
न्नमिति ॥ विनियोजनमुक्तमिति शेषः ॥१५॥ तानि च सप्तान्नानि कर्मस्वसाधारणमती दर्शपूर्णमासौ तत्साधारण

मन्नेयदिस्मद्यतइत्यादिनायमात्मावाङ्मयोमनोमयःप्राणमयइत्संतेनवाक्यसंदर्भेणोपष्टम्भनंकंडि
काद्वयरूपेणादर्शिताःनीत्याह॥ब्रीह्यादिकमितिपरहा॥ ॥नन्वुक्तसत्ताकानांजगदंतःपातिनांनेश्वर
निर्मितत्वाज्जीवनिर्मितत्वाभिधानमयुक्तमित्याशंक्याततद्रूपस्यापुनर्निर्मितत्वेपिभोग्यत्वाकारस्यजी

ईशेनयद्यप्येतानिनिर्मितानिस्वरूपतः॥तथापिज्ञानकर्मभ्यांजीवोकार्षीत्तदन्न
तां॥१७॥ईशकार्यंजीवभोग्यंजगद्द्वाभ्यांसमन्वितं॥पितृजन्याभर्तृभोग्यायथायोषात
थेष्यतां॥१८॥मायावृत्त्यात्मकोहीशःसंकल्पःसाधनंजनौ॥मनोवृत्त्यात्मकोजीवसंक
ल्पोभोगसाधनं॥१९॥

वनिर्मितत्वान्नैवमित्याह॥ईशेनेति॥ज्ञानकर्मभ्यांज्ञानंविहितंविप्रतिषिद्धं
चदेवतापरयोषिदादिविषयंध्यानंकर्मचविहितंयज्ञादिरूपंप्रतिषिद्धंहिंसादिरूपंताभ्यामित्यर्थः॥तदन्नतांते
षांब्रीह्यादीनांरूपाणांतानांस्वभोग्योपकरणत्वमित्यर्थः॥१७॥किमुक्तंभवतीतितत्राह॥ईशकार्यमिति॥
जगत्स्वरूपात्मत्वेनोक्तंब्रीह्यादिरूपंईशकार्यत्वेनजीवभोग्यत्वेनचद्वाभ्यांसंबंधमित्यर्थः॥एकस्योभ द्वै॰वि॰
यसंबंधेदृष्टांतमाह॥पितृजन्येति॥१८॥ईशजीवयोर्जगज्जनौकिंसाधनमित्यतआह॥माययेति॥१९॥ ४

नान्वीश्वरसृष्टवस्तुस्वरूपातिरिक्तोभोग्यत्वाकारएवनास्तिकोजीवेनसृज्यतइत्याशंक्याह॥ईशनिर्मितेति
एकस्मिन्नेवविषयेवस्तुविशेषेभोगउपलभ्यमानस्तत्प्रयोजकंभोग्याकारभेदंगमयतीत्यर्थः॥२०॥ननुम
तिभोग्यभेदःकल्पितसएवनास्तीत्याशंक्यदृश्यमानत्वान्नैवमित्याह॥हृष्यतीति॥एकोमणिमर्थीतंलब्ध्वाहृष्य

ईशनिर्मितमण्यादौवस्तुन्येकविधेस्थिते॥भोक्तृधीवृत्तिनानात्वात्तद्भोगोबहुधेष्यते॥२०॥
हृष्यत्येकोमणिंलब्ध्वाक्रुध्यत्यन्योह्यलाभतः॥पश्यत्येवविरक्तोत्रनहृष्यतिनकुप्यति॥२१॥
प्रियोऽप्रियउपेक्ष्यश्चेत्याकारामणिगास्त्रयः॥सृष्टाजीवैरीशसृष्टंरूपंसाधारणंत्रिषु॥

त्यन्यस्तथाविधस्तदलाभात्कुप्यतिअन्यस्तुमणौविषयेविरक्तस्तुतंपश्यत्येवलाभालाभनिमित्तौहर्षक्रोधौनप्रा
प्नोतीत्यर्थः॥२१॥केतेभोगभेदापरस्परजीवसृष्टाआकारभेदाइत्यतआह॥प्रियइति॥मणिनिष्ठाःप्रियत्वाप्रियत्वो
पेक्षत्वलक्षणात्र्याकारभेदाजीवैःसृष्टाःस्वविषयमिसाधारणमनुस्यूतंमण्यादिरूपंतदीशनिर्मितमित्यर्थः॥२२॥ ॥

उक्तं जीवसृष्टाकारभेदमुदाहरणांतरेण स्पष्टयति। भार्येति। ननंदा भर्तृभगिनी याता देवरपत्नी प्रतियोगिधिया भर्तृश्वसुरादिलक्षणप्रतियोगिगोचरया बुध्या तत्तदपेक्षयेत्यर्थः॥२३॥ ननु योषिद्विषयाणि भार्यास्नुषादिज्ञानान्येव भिन्नान्युपलभ्यंते न तु तद्विषयभूताया योषितः स्वरूपभेदो दृश्यतेऽतः प्रतियोगिधिया योषिद्भिद्यत इत्युक्तम

भार्यास्नुषा ननांदा च याता मातेत्यनेकधा॥ प्रतियोगिधिया योषिद्भिद्यते न स्वरूपतः॥२३॥
ननु ज्ञानानि भिद्यंतामाकारस्तु न भिद्यते॥ योषिद्वपुष्यतिशयो न दृष्टो जीवनिर्मितः॥२४॥ मै
वं मांसमयी योषित्काचिदन्या मनोमयी॥ मांसमय्या अभेदेपि भिद्यते हि मनोमयी॥२५॥
भ्रांतिस्वप्नमनोराज्यस्मृतिष्वस्तु मनोमयं॥ जाग्रन्मानेन मेयस्य न मनोमयतेति चेत्॥२६॥

युक्तं इति शंकते। नन्विति॥२४॥ ज्ञानवैलक्षण्यपरस्तेयं वैलक्षण्यं विना भूतत्वाहि याकारभेदोंगीकर्त्तव्य इत्येतदाशंक्ये न परिहरति। मैवमिति॥२५॥ ननु भ्रांत्यादिस्थले बाह्यविषयाभावात्तत्र भवतु मनोमयमस्तु प्रमितिस्थले तु तदनुपपत्तेर्बाह्यवस्तुनः सत्वादिति शंकते। भ्रांतीति। मानेन प्रत्यक्षादिप्रमाणेन मेयस्येत्यर्थः॥२६॥ ॥ द्वै॰वि॰ ५

प्रमितिस्थले बाह्यविषयसत्वमंगीकरोति। बाढमिति। कथं तर्हि तद्विषयस्य मनोमयत्वमुच्यत इत्यत आह। माने त्विति। माने विषयाकृतिस्तु तस्य मेयेन योगात् संबंधात्स्यात्। नन्विदं स्वकपोलकल्पितमित्याशंक्याह। भाष्येति॥२७॥ तत्र तावत्प्रकारद्वयमुदाहरति। मूषेति। यथा द्रुतं ताम्रं मूषायां सिक्तं सत्तन्निभं जायते तन्मूषाकारं भवति तथा। तथा रूपादीन् विषयान् व्याप्नुवद्विषयीकुर्वच्चित्तं ध्रुवमवश्यं तन्निभं दृश्यते उपलभ्यत इत्यर्थः॥२८॥ ननु ताम्रादेरग्निसंपर्काद्द्रुतस्य मूषानिषिक्तस्य काठिन्ये मूषानिघातेन शैत्यापत्तौ मूषाकारापत्तावपि

बाढं माने तु मेयेन योगात्स्याद्विषयाकृतिः॥ भाष्यवार्तिककाराभ्यामयमर्थ उदीरितः॥२७॥
मूषासिक्तं यथा ताम्रं तन्निभं जायते तथा॥ रूपादीन्व्याप्नुवच्चित्तं तन्निभं दृश्यते ध्रुवं॥२८
व्यंजको वा यथालोको व्यंग्यस्याकारतामियात्॥ सर्वार्थव्यंजकत्वाद्धीरर्थाकारा प्रदृश्यते॥

बुद्धेरमूर्त्तायास्ताम्रादिविलक्षणाया विषयव्याप्तावपि कुतस्तदाकारापत्तिरित्याशंक्य दृष्टांतांतरमाह। व्यंजक इति। यथा वा व्यंजकः प्रकाशकः आलोकः आतपादिर्व्यंग्यस्य प्रकाश्यस्य घटादेराकारतामाकारवत्त्वमियात्प्राप्नुयादेवं धीरपि सर्वार्थस्य व्यंजकत्वात् सकलपदार्थप्रकाशकत्वादर्थाकारा अर्थस्याकार इवाकारो यस्याः सा तथा प्रदृश्यते प्रकर्षेणोपलभ्यत इत्यर्थः॥२९॥ ॥

इदानीं वार्तिककारोक्तमाह ॥ मातुरिति ॥ मातुः प्रमाधिष्ठानबुद्धिस्थचिदाभासरूपात्प्रमातुर्मानाभिनिष्पत्तिर्मान समानासांतःकरणवृत्तिरूपस्याभिनिष्पत्तिर्निर्वृत्तिर्निर्गमः ॥ निष्पन्नमुत्पन्नं तन्मानं मेयं प्रमेयं घटादिरूपमेति प्राप्नोति ॥ किंच तन्मानं मेयाभिसंगतं प्रमेयेन एकसंबंधं मेयाभत्वं मेयस्याभेवाभा यस्य तन्मेयाभं तस्य भावस्तत्त्वं मेयसमानाकारतां प्रपद्यते प्राप्नोतीत्यर्थः ॥३०॥ नन्वस्त्वेवं प्रकृते किमायातमित्यत आह ॥ सत्येवमिति ॥ ननु मृन्मयघटस्येव मनोमयघटस्य तेनैव मनसा गृहीतुमशक्यत्वात् ॥ ग्राहकांतराभावाच्चासिद्धिरेवेत्याशंक्याह ग्राहकांतरा

मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् ॥ मेयाभिसंगतं तच्च मेयाभत्वं प्रपद्यते ॥३०॥ सत्ये
वं विषयौ द्वौ स्तो घटौ मृन्मयधीमयौ ॥ मृन्मयो मानमेयः स्यात्साक्षिभास्यस्तु धीमयः ॥ अन्वय
व्यतिरेकाभ्यां धीमयो जीवबंधकृत् ॥ सत्यस्मिन्सुखदुःखे स्तस्तस्मिन्नसति न द्वयं ॥३२॥

भावासिद्ध इत्यादि ॥ मृन्मय इति ॥ यथा मृन्मयो मानमेयस्तथा धीमयः साक्षिभास्य इति ॥३१॥ ननु तर्ह्येवं द्विविधे द्वैते ॥ अनयोः कस्य हेयत्वं कस्य वा नेति न ज्ञायत इत्याशंक्य जीवसृष्टस्यैव हेयत्वं ज्ञापयितुं तस्य बंधहेतुत्वं दर्शयति ॥ अन्वेति ॥ अन्वयव्यतिरेकावेव दर्शयति सत्यस्मिन्निति ॥ अस्मिन् जीवसृष्टे मानसप्रपंचे सति विद्यमाने सुखदुःखे स्तो भवतः ॥ असति तु तस्मिन् द्वयं सुखदुःखं च नास्तीत्यर्थः ॥३२॥ ॥

द्वै॰ वि॰
८

प्रतिकाकुः

ननु तावन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातामित्यत आह ॥ असत्येति ॥ नरो मनुष्य उपलक्षणमन्येषामपि स्वप्नादौ स्वप्नस्मृत्यादिकाले बाह्यार्थेऽनुकूले योषिदादौ प्रतिकूले व्याघ्रादौ च पारमार्थिके विषये असत्यपि अविद्यमाने बध्यते सुखदुःखाभ्यां युज्यते ॥ समाध्यादिषु त्वस्मिन्बाह्यार्थे सत्यपि न बध्यते न सुखदुःखादिनाभिनन्दति ॥ अतस्तद्विषयावन्वयव्यतिरेकौ न स्त इत्यर्थः ॥३३॥ मनोमयप्रपंचस्य बंधकत्वेनान्वयव्यतिरेकावुदाहरणेन स्पष्टयति सार्धं ॥ दूरदेशमिति ॥ देशांतरं प्राप्ते पुत्रे तत्र जीवत्येव सत्यत्र स्वगृहे स्थितः तस्य पिता विप्रलंभकस्य मिथ्यावचनैः परवंचक

असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः ॥ समाधिसुप्तिमूर्छासु सत्यप्यस्मिन्न बध्यते ॥३३॥ दू
रदेशं गते पुत्रे जीवत्येवात्र तत्पिता ॥ विप्रलंभकवाक्येन मृतं मत्वा प्ररोदिति ॥३४॥ मृतेऽपि त
स्मिन्वार्तायामश्रुतायां न रोदिति ॥ अतः सर्वस्य जीवस्य बंधकृन्मानसं जगत् ॥३५॥ विज्ञान
वादो बाह्यार्थवैयर्थ्यात्स्यादिहेति चेत् ॥ न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः ॥३६॥

सत्यत्पुत्रो मृत इत्येवंरूपेण वाक्येन स्वपुत्रं मृतं कल्पयित्वा प्रकर्षेण रोदनं करोति तस्मिन्नेव पुत्रे तत्रैव मृतेऽपि तद्वार्तायामश्रुतायां सत्यां न रोदनं करोति ॥३४॥ फलितमाह ॥ अत इति ॥३५॥ धीमयस्यैव जगतो बंधहेतुत्वांगीकारे बाह्यार्थविलापादपसिद्धांतपातः स्यादिति शंकते ॥ विज्ञानेति ॥ परिहरति ॥ नहृदीति ॥ यद्यपि मानसप्रपंचस्यैव बंधहेतुत्वं तथापि तद्धेतुत्वेन बाह्यस्यापि स्वीकारान्नैव विज्ञानवादप्रसंग इति भावः ॥३६॥ ॥

ननु नन्दाद्याकारसमर्पणाय बाह्यार्थोऽपेक्षणीयः पूर्वपूर्वभ्रमसप्रपञ्चसंस्कारस्यैव नरमानसप्रपञ्चहेतुत्वोपप
त्तेरित्याशंक्य प्रौढवादेन तदङ्गीकरोति॥ वैयर्थ्यमिति॥ नहि विज्ञानवादात्को नेदृश्यत आह॥ बाह्यमिति॥ विज्ञानवा
दिनो बाह्यार्थमेव प्रलयं तिविप्यन्त तथैव यमेवं नेदृश्यर्थः॥ प्रयोजनशून्यत्वादभ्युपगमोऽप्ययुक्त एवेत्याशंक्याह
प्रयोजनमिति॥ मानाधीना वस्तुसिद्धिर्न प्रयोजनाधीना मानसिद्धस्य प्रयोजनशून्यत्वमात्रेण सत्त्वस्य लौकिकैर्वैदि

वैयर्थ्यमस्तु बाह्यं न वारयितुमीश्महे॥ प्रयोजनमपेक्ष्यन्ते न मानानीति हि स्थितिः॥३७॥ बंधश्चे
न्मानसं द्वैतं तन्निरोधेन शाम्यति॥ अभ्यसेद्योगमेवातो ब्रह्मज्ञानेन किं वद॥३८॥ तात्कालिकद्वैत
शांतावप्यागामिजनिक्षयः॥ ब्रह्मज्ञानं विना न स्यादिति वेदान्तडिंडिमः॥३९॥ ॥

कैश्चाभ्युपगमादिति भावः॥३७॥ ननु मानसद्वैतस्यैव बंधहेतुत्वे तस्य मनोनिरोधात्मकयोगेनैव निवृत्तिसंभवाद्ब्रह्म
ज्ञानस्य बंधनिवर्तकत्वाभ्युपगमो विरुध्येतेति शंकते॥ बंधश्चेदिति॥ योगेन किं द्वैतोपशमस्तात्कालिक उच्यते आत्यंतिको
वेति विकल्प्याद्यमंगीकृत्य द्वितीयं दूषयति॥ तात्कालिकेति॥ ज्ञात्वा देवं मुच्यते सर्वपाशैः॥ ज्ञात्वा शिवं शांतिमत्यंतमे
ति॥ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः॥ तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति॥ इत्यादिश्रुतिभिरन्वयव्यतिरे द्वै॰वि॰ ७
काभ्यां ब्रह्मज्ञानादेव बंधनिवृत्तिरभिधीयत इति भावः॥३९॥ ॥

ननु बाह्यद्वैतनिवारणमंतरेणाद्वितीयब्रह्मज्ञानमेव नोदियादित्याशंक्य तन्निवारणाभावेन तस्य मिथ्यात्वज्ञानादे
वपारमार्थिकमद्वैतं बोद्धुं शक्यत इत्याह॥ अनिवृत्तेऽपीति॥४०॥ नद्वैतमृषात्वज्ञानमद्वैतज्ञानप्रयोजकमपि
तु तन्निवारणमेवेत्यभिनिविशमानं प्रत्याह॥ प्रलय इति॥ प्रलये प्रलयावस्थायां तन्निवृत्तौ तु तस्य द्वैतस्य निवृत्तौ स
त्यां तु विरोधिद्वैतज्ञानविरोधित्वेन नवदनिमित्तस्य द्वैतस्य निवारणेऽप्यपि गुरुशास्त्राद्यभावतः॥ गुरुशास्त्रादि

अनिवृत्तेऽपीशसृष्टे द्वैते तस्य मृषात्मतां॥ बुद्ध्वा ब्रह्माद्वयं बोद्धुं शक्यं वस्त्वैक्यवादिनः॥४०॥ प्रल
येन निवृत्तौ तु गुरुशास्त्राद्यभावतः॥ विरोधिद्वैतहानेऽपि न शक्यं बोद्धुमद्वयं॥४१॥ अबाध
कं साधकं च द्वैतमीश्वरनिर्मितं॥ अपनेतुमशक्यं चेत्यास्तां तद्द्विष्यते कुतः॥४२॥ ॥

स्य ज्ञानसाधनस्याभावाद्वैतोऽद्वयं वस्तु बोद्धुं शक्यं न भवति॥ अतस्तन्निवारणमप्रयोजकमिति भावः॥४१॥
तथापि सति द्वैते कथमद्वैतज्ञानमित्याशंक्याह॥ अबाधकमिति॥ ईश्वरनिर्मितं द्वैतमबाधकं तन्मृषात्वज्ञाने
नैवाद्वैतज्ञानोत्पत्तेः साधकं च गुरुशास्त्रादिरूपस्य तस्य द्वैतस्य ज्ञानसाधनत्वादाकाशादिरूपं द्वैतम
स्मान्निरपनेतुमशक्यं चेति हेतोस्तद्द्वैतमास्तां कुतः कारणाद्द्विष्यत इत्यर्थः॥४२॥ ॥

इदानीं जीवसृष्टं द्वैतं विवक्षन्नो जीवेति। किं तद्द्विविधमपि सदा हेयमेव नेत्याह। उपाददीतेति। आतत्त्वस्यावबोध
नात्तत्त्वस्यावबोधपर्यन्तमित्यर्थः॥४३॥ किं तच्छास्त्रीयं द्वैतमित्याकांक्षायामाह। आत्मेति। प्रत्यग्रूपस्य ब्रह्मणो
विचाराख्यं यच्छ्रवणादिकं तद्धि शास्त्रीयं मानसं जगदित्यर्थः। तत्त्वात्तत्त्वस्यावबोधनादित्युक्तमनुपपन्नं आसुप्तेरा
मृतेः कालं नयेद्वेदान्तचिंतयेत्युक्तत्वादित्याशंक्याह। बुद्धेरिति तत्त्वे ब्रह्मात्मैक्यलक्षणे बुद्धे साक्षात्कृते सतीत्यर्थः

जीवद्वैतं तु शास्त्रीयमशास्त्रीयमिति द्विधा॥ उपाददीत शास्त्रीयमातत्त्वस्यावबोधनात्॥४३॥
आत्मब्रह्मविचाराख्यं शास्त्रीयं मानसं जगत्॥ बुद्धे तत्त्वे तच्च हेयमिति श्रुत्यनुशासनं॥४४॥
शास्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः॥ परमं ब्रह्म विज्ञाय उल्कावत्तान्यथोत्सृजेत् ४५

॥४५॥ तच्छास्त्रसुप्तेरिति वाक्यस्य का गतिरिति चेत्। इह द्यात्रावसरं किंचित्कामादीनां मनागपीति पूर्वविंनिकामाद्यव
सरप्रदानस्य निषिद्धत्वात्तत्परतैवेति विवक्षमत्रातो न कश्चिदनुपपत्तिरिति। तावत्तत्त्वबोधोत्तरकालं तद्धेयत्वप्रतिपा
दनपराः श्रुतीरुदाहरति। शास्त्राणीति॥४५॥

द्वै·वि·
८

तमेकं विजानीतेत्यनेन तमेवैकं जानथ। आत्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुरित्यर्थः। पठितां आशा
स्त्रीयस्यापि द्वैतस्यावांतरभेदमाह। अशास्त्रीयेति। द्विधा द्विविधमपि क्रमेणोदाहरति। कामेति। इतरत् मंदमि
त्यर्थः॥४९॥ किमनयोः शास्त्रीयद्वैतस्येव तत्त्वबोधोत्तरकालमेव हेयत्वं नेत्याह। उभयमिति। प्राग्निवारणं किम

ग्रंथमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः॥ पलालमिव धान्यार्थी त्यजेद्ग्रंथमशेषतः॥४६॥ तमेव धी
रो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ नानुध्यायाद्बहूञ्छब्दान्वाचो विग्लापनं हि तत्॥४७॥ तमे
वैकं विजानीथ ह्यन्या वाचो विमुञ्चथ॥ यच्छेद्वाङ्मनसी प्राज्ञ इत्याद्याः श्रुतयः स्फुटाः॥४८॥ अशा
स्त्रीयमपि द्वैतं तीव्रं मंदमिति द्विधा॥ कामक्रोधादिकं तीव्रं मनोराज्यं तथेतरत्॥४९॥ उभयं
तत्त्वबोधात्प्राङ्निवार्यं बोधसिद्धये॥ शमः समाहितत्वं च साधनेषु श्रुतं यतः॥५०॥ ॥ ॥

र्थमित्यर्थः आद्बोधितान्तर्लिंगमाह। शम इति। यतस्तत्त्वावबोधनः प्राक्तयोर्हेयत्वं तत एवमनित्यानित्यवस्तुविवेका
दिब्रह्मज्ञानसाधनेषु मध्ये शांतः समाहित इति पदाभ्यां शमसमाधी श्रुत्युक्ते इत्यर्थः॥५०॥ ॥

ननु तत्त्वबोधात्प्राक् निवार्यमित्यभिधानादुत्तरकालमस्य स्वीकार्यतास्यादित्याशंक्याह। बोधादिति। उक्तमर्थमि
तिरेकमुखेन दृढयति। कामादीनि। कामादिरूपोयःक्लेशःसएवबंधस्तेनयुक्तस्यबंधस्यमुक्ततात्जीवन्मुक्तत्वंन
हिनास्तीत्यर्थः॥५१॥ ननु जन्मादिसंसाराद्दुद्विग्नस्यात्यंतिकपुरुषार्थरूपया विदेहमुक्त्यैवालंकिमनयाऽऽपातिक
याजीवन्मुक्त्येतिकृते। जीवन्मुक्तीति। ऐहिकभोगनिवृत्तिनयाजीवन्मुक्तिलाभेतदंतेआमुष्मिकभोगनिवृत्तिमयावि

बोधात्पूर्वं चितनवेयं जीवन्मुक्तिविनिश्चये। कामादिक्लेशबंधेन हि स मुक्तता॥५१॥ जीवन्मुक्तिरियं मा — मुक्तस्य न १
भूज्जन्माभावे त्वहं कृती। तर्हि जन्मापि ते स्वेवस्वर्गमार्गकृतीनवान्॥५२॥ दयातिशयदोषेणस्व
र्गो मोहेयोयदा तदा। स्वयं दोषतमात्मीयं कामादिः किंन हीयते॥५३॥ तत्त्वं बुध्वापि कामादीन्
निःशेषं न जहासि चेत्॥ यथेष्टाचरणं तेस्यात्कर्मशास्त्रातिलंघिनः॥५४॥ ॥

देहमुक्तिरपित्याज्यास्यादितिध्वनितं शंकापरिहरति। तर्हीति॥५२॥ ध्वनितंबंधीमोचनं शंकते। शंकयेति। दोषयुक्तत्वे
त्वेनस्वर्गादिस्त्याज्यत्वेनकल्पपुरुषार्थविघातत्वेनानिवेदोषरूपस्यकामादेःसुतरांत्याज्यत्वमित्याह। स्वयमिति
॥५३॥ ननु वैराग्यादिसंपादनेनासंतानर्थहेतोःकामादेस्त्यक्तत्वात् ऐहिकभोगमात्रोपयोगिकामाद्यनुपगमे को
दोषइत्याशंक्याह। तत्त्वमिति॥ तत्त्ववित्त्वाभिमानेनविधिनिषेधशास्त्रमतिक्रम्यकामाद्यधीनतयावर्तमानस्य त — वे॰वि॰
वयथेष्टाचरणं स्यादित्यर्थः॥५४॥ ॥ — ८

अस्तु को दोषइत्याशंक्य तदनिष्टत्वप्रतिपादनपरं सुरेश्वराचार्यवचनमुदाहरति। बुद्धेति। बुद्धाद्वैतसतत्त्वस्य देहस्य द्वै
तस्वस्वरूपं ब्रह्म येन स बुद्धाद्वैतसतत्त्वस्तस्य विदुषो यथेष्टाचरणं यदि स्यात्। तर्हि अशुचिभक्षणादिकमपि स्यात्
तथासति शुनां तत्त्वदृशां चैव न कोपि विशेषः स्यादित्यर्थः॥५५॥ एतावता किमनिष्टमापादितमित्याशंक्य स्वोपहास

बुद्धाद्वैतसतत्त्वस्य यथेष्टाचरणं यदि। शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे॥५५॥ बो
धात्पुरा मनोदोषमात्रात्क्लिष्टोस्यथाधुना। अशेषलोकनिंद्यश्चेत्यहो ते बोधवैभवम्॥५६॥ वि
ड्वराहादितुल्यत्वं माकांक्षीस्त्वविज्ञवान्। सर्वधीदोषसंत्यागाल्लोकैः पूज्यस्व देववत्॥५७॥

मुत्तरमाह। बोधादिति॥ तत्त्वज्ञानोदयात्प्राक् कामक्रोधादिचित्तदोषैस्त्वं क्लेशोऽभूत्। इदानींतु सर्वलोकनिंद
याऽपि सहस्व इति क्लेशद्वैगुण्यमितिभावः॥५६॥ तर्हि किं कर्तव्यमित्यत आह॥ विड्वराहेति। सर्वोत्कर्षहेतुज्ञान
वांस्त्वं कामादिग्रस्तत्वेन सर्वाधमविड्वराहादिसाम्यं माकांक्षीः। किंतु कामादिचित्तदोषत्यागेन सकलमनोदोषहा
नेन सर्वजनैर्देववत्पूज्यश्च पूज्योभवेत्यर्थः॥५७॥ ॥

तत्त्यागोपायमाह। काम्येति। काम्याः कामनाविषयाः स्त्र्यादयस्तादयो ये तेषां दोषादीनां ते काम्यादयस्तेषां ये दोषनित्यत्वमालिन्यत्वादयस्तेषां दृष्टिरवलोकनमाद्यं येषां कोपस्वरूपविचारादीनां ते तथोक्तास्तेषां कामादित्याग हेतुत्वे प्रमाह। प्रसिद्धेति। नन्वस्तु ततः किमायातमित्यत आह। तानन्विति। ननु कामादीनामनर्थहेतुत्वात्त्याज्यत्व मस्तु मनोराज्यस्य तु तथात्वाभावात्तस्यागो नापेक्षित इति शंकते। उत्पन्नमिति। साक्षादनर्थहेतुत्वाभावेऽपि परंपरयात

काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः॥ प्रसिद्धा मोक्षशास्त्रेषु तानन्विष्य सुखी भव॥५९॥
सञ्जातमेव कामादि मनोराज्येन कार्दति॥ अत्रोपबीजदोषत्वाच्छ्रीभगवतेरिता॥६०॥
ध्यायतो विषयान्पुंसः संगस्तेषूपजायते॥ संगात्संजायते कामः कामात्क्रोधोऽभिजायते
॥६१॥ अशक्यं जेतुं मनो मनोराज्यं निर्विकल्पसमाधितः॥ सुसंपादः क्रमात्सोऽपि सविकल्पसमाधि
ना॥६२॥

देउत्वान्माउपेक्ष्यमेवेत्यं परिहरति। अत्रेति॥६०॥ परंपरयानर्थहेतुत्वं भगवदुक्त मुदाहरति। ध्यायत इति॥६१॥ तर्ह्यस्य मनोराज्यस्य कः परिहारोपाय इत्यत आह। अशक्यमिति। सोऽपि क्रमः कथं सिध्यतीत्याह। सुसंपाद इति॥६२॥ ॥

दै· वि·
१०

नन्वष्टांगयोगयुक्तस्य तथास्तु तद्रहितस्य का गतिरित्यत आह। बुद्धेति। बुद्धमवगतं तत्त्वं ब्रह्मात्मैक्यलक्षणं येन स बुद्धतत्त्वस्तेन कामक्रोधादिबुद्धिदोषरहितेन एकांतवासिना विजनदेशनिवासशीलेन पुरुषेण दीर्घं प्लुतस्वरादिमा नोपेतं प्रणवमोंकारमुच्चार्य मनोराज्यं विलीयते विनिवर्त्यत इत्यर्थः। मनोराज्यविजये किं भवतीत्यत आह। जितेत स्मिन्निति। यथा मूकः सकलवाग्व्यवहाररहितस्तिष्ठत्येवं मनोऽपि सर्वव्यापाररहितं अवतिष्ठत इत्यर्थः। आत्यन्तिक मनोवस्थानस्य पुरुषार्थत्वे प्रमाणमाह। एतत्पदमिति। एतत्पदमित्यं द्वयोरर्थः॥६१॥ वासिष्ठश्लोकवाक्यद्वयमु

बुद्धतत्त्वेन धीदोषशून्येनैकान्तवासिना॥ दीर्घं प्रणवमुच्चार्य मनोराज्यं विलीयते॥६२॥ जितेत
स्मिन्वृत्तिशून्यं मनस्तिष्ठति मूकवत्॥ एतत्पदं वसिष्ठेन रामाय बहुधेरितं॥६३॥ दृश्यं नास्ती
ति बोधेन मनसो दृश्यमार्जनं॥ संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः॥६४॥ विचारितमलं शा
स्त्रं चिरमुद्ग्राहितं मिथः॥ संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदं॥६५॥ ॥

दाहरति। दृश्यमिति। नेह नानास्ति किंचनेत्यादिश्रुत्या द्वितीयवस्त्वातिरिक्तजगदभावज्ञानेन मनसः सकाशाद्दृश्य निवारणं संपन्नं यदि तर्हि निरतिशयं मोक्षसुखं निष्पन्नमिति जानीयादित्यर्थः। किंच अत्र वेदान्तशास्त्रं सूत्रभाष्यं विचारितं न यापरस्परं गुरुशिष्यादिसंवादद्वारा चिरकालं ग्राहितं च एवं कृत्वा किं निश्चितमित्याह॥ संत्यक्तेति। सम्यक्परित्यक्तकामादिवासनान्मनसस्तूष्णीभावादृते अधिकः पुरुषार्थो नास्तीति निश्चितमित्यर्थः॥६५॥

एवंनिर्विकल्पस्थितस्यप्रारब्धकर्मणाविक्षेपेसतितत्प्रतीकारोपायकश्चनपेक्षायामाह॥विक्षिप्यतेइति॥भोग
प्रदेनप्रारब्धकर्मणाबुद्धिःकदाचिद्विक्षिप्यतेचेत्तर्हिसाबुद्धिरभ्यासपाटवात्तदेवपुनरपिसमाहितास्यादित्यर्थः
॥६६॥सदाचित्तविक्षेपरहितस्यब्रह्मवित्त्वमप्यौपचारिकमित्याह॥विक्षेपइति॥पारदर्शिनोवेदान्तपारंगताइत्यर्थः॥६७

विक्षिप्यतेकदाचिद्धीःकर्मणाभोगदायिना॥पुनःसमाहितासास्यात्तदेवाभ्याससपाटवात्
॥६६॥विक्षेपोयस्यनास्त्यस्यब्रह्मवित्त्वंनमन्यते॥ब्रह्मैवायमितिप्राहुर्मुनयःपारदर्शिनः॥
॥६७॥दर्शनादर्शनेहित्वास्वयंकेवलरूपतः॥यस्तिष्ठतिसतुब्रह्मन्ब्रह्मनब्रह्मवित्स्वयं
॥६८॥ ॥

अत्रापिवासिष्ठवाक्यमुदाहरति॥दर्शनेति॥योब्रह्मज्ञानाभिज्ञानाभीतिव्यवहारद्वयंपरित्यज्यस्वयमद्वितीयचै
तन्यमात्ररूपेणावतिष्ठते॥सस्वयंब्रह्मैवनब्रह्मविदित्यर्थः॥६८॥सफलद्वैतविवेचनमुपसंहरति॥ ॥

जीवन्मुक्तेरिति॥असावुक्तप्रकाराजीवन्मुक्तेःपराकाष्ठानिरतिशयपर्यवसानभूमिर्जीवद्वैतस्यमनोमयरूपं
चस्यविवर्जनात्परित्यागाल्लभ्यतेप्राप्यतेअतःकारणादिदंजीवद्वैतमीशद्वैतमीशद्वैतादीश्वरसृष्टद्वैताद्विवेचि

जीवन्मुक्तेःपराकाष्ठाजीवद्वैतविसर्जनात्॥लभ्यतेसावतोत्रेदमीशद्वैताद्विवेचितं॥ ॥
६९॥ ॥इतिद्वैतविवेकपदयोजना॥ ॥

तंविविच्यप्रदर्शितमित्यर्थः॥६९॥ ॥इतिश्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्य
किंकरेणरामकृष्णाख्यविदुषाविरचिताद्वैतविवेकपदयोजनासमाप्ता॥ ॥श्रीरस्तु॥ ॥

2